Shri Ganeshamahatmyam Devarshayakritam

# શ્રીગણેશમાહાત્મ્યં દેવર્ષયકૃતં

## Document Information

Text title : Shri Ganeshamahatmyam Devarshayakritam

File name : gaNeshamAhAtmyaMdevarShayakRRitaM.itx

Category : ganesha, mudgalapurANa

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 27 | 8.27 16-33||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીગણેશમાહાત્મ્યં દેવર્ષયકૃતં

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમો નમસ્તે પરમાત્મને વૈ સદા ગણાનાં પતયે ગણાત્મને ।
અનન્તમાયામયખેલકારિણે પરેશ બ્રહ્મેશ નમો નમસ્તે ॥ ૧૬॥
નમસ્તુભ્યં મહાવિઘ્નનાશનાય મહાત્મને ।
વિઘ્નેશાય સુભક્તાનાં પાલકાય નમો નમઃ ॥ ૧૭॥
હેરમ્બાય મહાદીનપાલકાય ચ ઢુણ્ઢયે ।
લમ્બોદરાય દેવાય દેવદેવેશ તે નમઃ ॥ ૧૮॥
અનાથાનાં પ્રણાથાય નાથહીનાય તે નમઃ ।
નાથાનાં નાથરૂપાય વક્રતુણ્ડાય વૈ નમઃ ॥ ૧૯॥
પરાત્પરતમાયૈવ યોગશાન્તિપ્રદાય તે ।
યોગાનાં પતયે તુભ્યં નમો યોગાય તે નમઃ ॥ ૨૦॥
સગુણાય નમસ્તુભ્યં નિર્ગુણાય નમો નમઃ ।
સગુણનિર્ગુણાભ્યાં ચ વર્જિતાય નમો નમઃ ॥ ૨૧॥
અનન્તમાયયા દેવ ચારિણે તે નમો નમઃ ।
માયાહીનાય માયાયૈ માયિનાં મોહકારિણે ॥ ૨૨॥
મૂષકોપરિ સંસ્થાય મૂષકધ્વજધારિણે ।
સિદ્ધિબુદ્ધિપતે તુભ્યં સ્વાનન્દસ્થાય તે નમઃ ॥ ૨૩॥
કિં સ્તુમસ્ત્વાં ગણાધ્યક્ષ શાન્તિરૂપં પરાત્પરમ્ ।
વેદાદયઃ સમર્થા ન યોગિનઃ શાસ્ત્રસંયુતાઃ ॥ ૨૪॥
એવમુક્ત્વા પ્રણેમુસ્તં દેવર્ષયો મહામુને ।
સ્વસ્વસ્થાનં યયુઃ સર્વે હર્ષયુક્તેન ચેતસા ॥ ૨૫॥
વર્ણાશ્રમયુતા લોકા બભૂવુર્વિગતજ્વરાઃ ।
સર્વે દેવર્ષયસ્તત્ર ભાગયુક્તા બભૂવિરે ॥ ૨૬॥
એવં વૈશાખમાસસ્ય વ્રતેન દેવનાયકઃ ।

હત્વા વૃત્રાસુરં વિપ્ર દેવૈઃ સુખયુતોઽભવત્ ॥ ૨૭॥
અન્યચ્ચ શ ૃણુ માહાત્મ્યં વૈશાખવ્રતસમ્ભવમ્ ।
સર્વપાપહરં દુઃખનાશનં શ્રવણાન્નૃણામ્ ॥ ૨૮॥
ગાર્ગ્યઃ કોઽપિ દ્વિજો નામ્ના શિવદત્તો બભૂવ હ ।
સ ગણેશપરો નિત્યમભજદ્ગણનાયકમ્ ॥ ૨૯॥
સ્વધર્મસંયુતો નિત્યં ભાર્યાપુત્રસમન્વિતઃ ।
અગ્નિહોત્રપરો ભૂત્વાઽતિષ્ઠત્ સ્વતેજસા યુતઃ ॥ ૩૦॥
તત્રાગતં સ યોગીન્દ્રં ગર્ગં સર્વાર્થકોવિદમ્ ।
તં પ્રણમ્ય મહાભાગં શિવદત્તઃ પુપૂજ હ ॥ ૩૧॥
નિત્યં સેવાપરં દૃષ્ટ્વા સુતં વિનયસંયુતમ્ ।
મુક્તિમિચ્છન્તમત્યન્તં ગર્ગઃ સંહર્ષિતોઽભવત્ ॥ ૩૨॥
ઉવાચ શિવદત્તં સ પુત્ર વાઞ્છસિ કિં વદ ।
તત્કરિષ્યામિ તે શીલસન્તુષ્ટોઽહં ન સંશયઃ ॥ ૩૩॥

ઇતિ દેવર્ષયકૃતં શ્રીગણેશમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૭ । ૮.૨૭ ૧૬-૩૩॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 27 . 8.27 16-33..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganeshamahatmyam Devarshayakritam*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*